दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-187 | 1 | अप्रैल 29, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लत्रयोदशी
बैशाख 16 प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचल-पञ्चायत-निर्वाचनम् त्रिषु चरणेषु भविष्यति मतदानम्, आचारसंहिता प्रवृत्ता

3 शिक्षामन्त्री धर्मेन्द्रप्रधानः वर्तमानसत्राय एन.सी.ई.आर.टी इत्यनेन सद्य एव प्रकाशितानां पाठ्यपुस्तकानां उपलब्धतायाः वितरणस्य च समीक्षाम् अकरोत्

4 धार्मिककार्यक्रमाणां नाम्ना मार्गावरोधः न करणीयः - सर्वोच्चन्यायालयः

## प्रधानमन्त्री नरेन्द्रमोदी वाराणस्याम् पञ्चाशदधिकत्रिशतमुत्तरषट्सहस्रकोटि-रुप्यकाणां विविधपरियोजनानाम् उद्घाटनं शिलान्यासम् अमृतभारत-एक्सप्रैस् इति रेलयानद्वयस्य ध्वजोत्तोलनेन सह शुभारम्भं च कृतवान्



प्रधानमन्त्री नरेन्द्रमोदी स्वकीयायां द्विदिवसीयायां यात्रायाम् उत्तरप्रदेशस्य वारणसीनगरं प्राप्तवान्। तत्र सः महिलासम्मेलनम् इति कार्यक्रमे भागं भजितवान् सहैव पञ्चाशदधिकत्रिशतमुत्तर-षट्सहस्रकोटि-रुप्यकाणां विविधपरियोजनानाम् उद्घाटनं शिलान्यासं च कृतवान्। प्रधानमन्त्री अमृतभारत-एक्सप्रैस् इति रेलयानद्वयस्य ध्वजोत्तोलनेन सह शुभारम्भं कृतवान्। एतयोः रेलयानयोः एकं रेलयानं बनारसनगरात् पुणेनजनपदस्य हदप्स-रेलस्थानकं यावत् अपरं च अयोध्यातः समारभ्य मुम्बईनगरस्य लोकमान्यतिलक टर्मिनस्-स्थानकं प्रति गमिष्यतः।



### सिक्किम-राज्यस्य पञ्चाशत्तमस्य राज्योत्सवस्य समापनसमारोहे प्रधानमन्त्री परियोजनानां उद्घाटनम् अकरोत्

प्रधानमन्त्री नरेन्द्रमोदी गङ्गटोक नगरस्य पालजोर-क्रीडाङ्गणे चतुः सहस्र-कोटि-रूप्यकाणां बहुविधविकास-परियोजनानां उद्घाटनम्, शिलान्यासं च कृतवान्। सः पूर्वोत्तरक्षेत्राणां कृते षट् क्रिकेट्-अकादमीनाम् घोषणाम् अपि अकरोत्। सिक्किम-राज्यस्य पञ्चाशत्तमस्य राज्योत्सवस्य समापनसमारोहे सः परियोजनानां उद्घाटनम् अकरोत्। जनसमूहं सम्बोधयन्, श्रीमोदी पूर्वोत्तरं भारतस्य "अष्टलक्ष्मी" इति वर्णितवान् तथा च "ऐक्ट् ईस्ट, ऐक्ट् फास्ट्" इत्यस्य प्रशासकीय-संकल्पस्य उपरि अवधानं प्रदत्तवान्। प्रधानमन्त्रिणा सिक्किम्-राज्यं पूर्वस्य स्वर्गम् इति वर्णितम्, राज्यस्य बृहत्तमासु पर्यटनक्षमतासु बलं प्रदत्तम्। सः अवदत् यत्, सिक्किम-राज्ये मूलसौकर्याणां, सम्पर्काणां च उन्नत्यैः सर्वकारः सर्वोच्चप्राथमिकतां प्रददाति। प्रधानमन्त्री अवदत् यत्, जैविक-प्राकृतिक-कृषि क्षेत्रे सिक्किम-राज्यस्य साफल्यं देशस्य कृते आदर्शः अभवत्। अस्य अवसरस्य स्मरणार्थं "एकतायाः सहस्राणि सोपानानि" इत्यनेन शीर्षकेन भव्यः सांस्कृतिकः कार्यक्रमः आयोजितः, यस्मिन् सार्धैकसहस्रतोप्यधिकाः स्थानीयकलाकाराः सम्मिलिताः अभवन्।

## सुभाषितम्

**खद्योतो द्योतते तावत्**
**यावन्नोदयते शशि:।**
**उदिते तु सहस्रांशौ,**
**न खद्योतो न चन्द्रमा।।**

जुगनू तभी तक चमकते हैं जब तक आकाश में चन्द्रमा का उदय नहीं होता है। परन्तु सूर्य के आकाश में उदय होने पर न तो जुगनू की चमक दिखाई देती है और न ही चन्द्रमा की।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्



### वर्धमानस्य तापस्य, उष्णतरङ्गस्य च प्रतिकूलप्रभावात् कर्मकराणां श्रमिकाणां च रक्षणाय सर्वकारेण राज्यानां केन्द्रशासितप्रदेशानां च कृते राष्ट्रव्यापी उष्णतरङ्ग-परामर्शः प्रसारितः

वर्धमानस्य तापस्य, उष्णतरङ्गस्य च प्रतिकूलप्रभावात् कर्मकराणां श्रमिकाणां च रक्षणाय सर्वकारेण राज्यानां केन्द्रशासितप्रदेशानां च कृते राष्ट्रव्यापी उष्णतरङ्ग परामर्शः प्रसारितः अस्ति। नियोक्तृभ्यः, अधिभोक्तृभ्यः, उद्योगेषु, निर्माणसंस्थासु च कर्मचारिणां कृते सुरक्षोपायानां तत्क्षण-प्रभावेण कार्यान्वयनार्थं आवश्यकानि निर्देशानि निर्दिशन्तु। श्रम-आजीविका मन्त्रालयः श्रमिकाणां, विशेषतः बाह्य-श्रम-गहन-क्षेत्रयोः नियोजितानां संरक्षणार्थं समन्वितस्य, बहु-क्षेत्रीयस्य, बहु-आयामी-दृष्टिकोणस्य आवश्यकतायाः विषये अवधानं दत्तवान्। मन्त्रालयः पर्याप्तमात्रायां पेयजल-सुविधाः, विश्रामक्षेत्राणां व्यवस्था, कार्यस्थलानां शीतलीकरणम् च सुनिश्चतुम् आदिष्टवान्। कर्मचारिणां नियमित-स्वास्थ्य-परीक्षणं सुनिश्चितं कर्तुं स्वास्थ्य-विभागेन सह समन्वयं स्थापयितुं ते सूचिताः सन्ति।

## अश्विनी वैष्णवः विशाखापत्तनमे गूगल्-क्लाउड-इण्डिया-ए.आई. हव् इत्यस्य शिलान्यासं कृतवान्



केन्द्रीय-रेल-सूचना-प्रसारण-मन्त्री वैष्णवः आन्ध्रप्रदेशस्य मुख्यमन्त्री एन. चन्द्रबाबु-नायडुः इत्यनेन सह सम्मिल्य विशाखापत्तनमे गूगल्-क्लाउड-इण्डिया-ए.आई. हव् इत्यस्य शिलान्यासं कृतवान्। कार्यक्रमत्राय उपस्थितं जनसमूहं सम्बोधयन् केन्द्रीयमन्त्री अवदत् यत् देशः इलेक्ट्रानिक्स् उत्पादनं, सेमिकण्डक्टर-उत्पादनं, उन्नत-चिप-विन्यासं, कृत्रिम बुद्धि-प्रौद्योगिकीं च प्रति अग्रे गमिष्यति। मन्त्रिवर्यः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिवर्यस्य मेक-इन-इण्डिया इति दृष्टिकोणम् अनुसरत् विश्वव्यापी विश्वसनीयः च इलेक्ट्रानिक्स निर्माणसहभागी इति रूपेण भारतं द्रुतगत्या उद्गतम् अस्ति।

## आतङ्कवादं विरुध्य कठोरसञ्चेतनाम् अयच्छत् रक्षामन्त्री राजनाथसिंहः

रक्षामन्त्री राजनाथसिंहः आतङ्कवादं विरुध्य कठोरसञ्चेतनाम् अयच्छत्, आतङ्कवादस्य केन्द्राणि न्यायोचित-दण्डात् मुक्तानि न सन्ति इति सुदृढीकृतवान्। अवधेयं यत् किर्गिस्तानस्य बिश्केक नगरे शाङ्घाई-सहकार-सङ्घटनस्य रक्षामन्त्रिमण्डले सिंह-वर्यः सम्बोधयन् आसीत्। सः जम्मू-कश्मीर-राज्यस्य पहलगाम नगरे सद्य एव कृतस्य प्राण-घातकातङ्ख्याक्रमणस्य वार्षिकोत्सवम् अस्मारयत्। सिंह-वर्यः अवदत् यत्, आक्रमणस्य प्रतिक्रियारूपेण सिन्दूराभियानम् इत्यस्य समये, भारतं स्वस्य दृढ संकल्पं प्रादर्शयत् यत् आतङ्कवादस्य केन्द्राणि न्यायोचित दण्डात् मुक्तानि न सन्ति। रक्षामन्त्रिणा आतङ्कवादस्य, पृथकतावादस्य, उग्रवादस्य च सुरक्षित-आश्रयस्थानानां निर्मूलनार्थं, राजनैतिक-अपवादान् निराकृत्य च एकीकृतपक्षस्य आह्वानम् अकरोत्। सः सुदृढरूपेण अवदत् यत् राष्ट्रस्य सार्वभौमत्वस्य उपरि आक्रमणं कुर्वन्तं राज्य-प्रायोजितस्य पारसीम्नः आतङ्कवादं विरुध्य समदृष्टिः भवेत्, यतः पृथग्दृष्टेः स्थानम् नास्ति।

## तुर्की-देशात् मोहम्मद-सलीम-डोला इत्येषः भारतं प्रति आनीतः

दाउद इब्राहिम् इति कुख्यातस्य मादकद्रव्याणां निकटसहायकः व्यापारी च मोहम्मद-सलीम-डोला इत्येषः भारतं प्रति आनीतः। केन्द्रीय गृह-मन्त्री अमितशाहः अवदत् यत् नार्कोटिक्स्-कण्ट्रोल-ब्यूरो इत्यनेन तुर्की-देशात् सलीम-डोला इत्यस्य प्रत्यावर्तनप्रक्रियायां महती सफलता प्राप्ता। एकस्मिन् सामाजिक सञ्जाल संदेशे, श्रीशाहवर्यः अवदत् यत् सलीमडोला इत्यस्य निगडनेन, सङ्गठित अपराध-सङ्घस्य सदस्याः न्यायालयम् आनेतुं नरेन्द्रमोदी-सर्वकारस्य दृढः संकल्पः प्रतिबिम्बयते।

# हिमाचल-पञ्चायत-निर्वाचनम् त्रिषु चरणेषु भविष्यति मतदानम्, आचारसंहिता प्रवृत्ता




**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशे नगरनिकाय-निर्वाचनात् परं पञ्चायतीराज- संस्थानां निर्वाचनस्य शङ्खनादः जातः। राज्य-निर्वाचन-आयोगेन मङ्गलवासरे निर्वाचन- समयसारिणी प्रसारिता। अनेन सहैव प्रदेशे आचारसंहिता प्रवृत्ता अभवत्। हिमाचले त्रिषु चरणेषु- २६, २८ तथा ३० मई दिनाङ्केषु जिला परिषद, पञ्चायतसमिति-सदस्य, पञ्चायतप्रधान- उपप्रधान- वार्डसदस्यानां च कृते मतदानं भविष्यति। जनपद-निर्वाचन- अधिकारिणः (DC) स्व- स्व- जनपदेषु मतदान-तिथीनां निर्धारणाय अधिकृताः कृताः। प्रदेशस्य ३,७५४ पञ्चायतेषु कुल ५०,७९,०४८ मतदातारः स्व-मताधिकारस्य प्रयोगं करिष्यन्ति। एतेषु २५,६७,७७० पुरुषाः, २५,११,२४९ महिलाः, २९ अन्ये मतदातारः सम्मिलिताः सन्ति। विशेषो विषयः अयं यत् ५२,३४९ युनः प्रथमतया मतदानं करिष्यन्ति। निर्वाचनप्रक्रियायै सम्पूर्णे प्रदेशे २१,६७८ मतदानकेन्द्राणि स्थापयिष्यन्ते। एतेषु ४५८७ मीटर् उत्तुङ्गतायां स्थितं सर्वोच्चं मतदानकेन्द्रं लाहौल- स्पीति- जनपदस्य कौमिक-विद्यालये भविष्यति, यत् भौगोलिकदृष्ट्या अतीव कठिनक्षेत्रे स्थितम् अस्ति। जनपदपरिषद्, पञ्चायतसमिति, प्रधान- उपप्रधान- पञ्चायतसदस्यानां च कृते पृथक्- पृथक् वर्णयुतानि मतपत्राणि भविष्यन्ति। एतेषां पदानां कृते आहत्य ६० लक्षं मतपत्राणि निर्मितानि। मतपत्राणां वर्णाः भिन्नाः अतः कृताः येन मतदातृषु कोऽपि भ्रमः न भवेत्। अशिक्षिताः जनाः मतपत्रस्य वर्णं दृष्ट्वा मताधिकारं प्रयोक्तुं शक्ष्यन्ति। ८० वर्षतः अधिकाः वृद्धाः मतदानकेन्द्रेषु एव मतदानं करिष्यन्ति।
राज्य- निर्वाचन- आयुक्तः अनिलखाची महोदयः पत्रकारगोष्ठ्यां निर्वाचन-समयसारिणीं घोषयन् अवदत् यत् निर्वाचनकार्यक्रमस्य अधिसूचना २९ अप्रैल दिनाङ्के भविष्यति। नामाङ्कनपत्राणां प्रस्तुतीकरणं ७, ८, ११ मई दिनाङ्केषु च भविष्यति। १२ मई दिनाङ्के नामाङ्कनपत्राणां सूक्ष्म-परीक्षणं भविष्यति। १४-१५ मई पर्यन्तं प्रत्याशिनः स्वनामानि प्रत्याहर्तुं शक्ष्यन्ति, १५ दिनाङ्के एव निर्वाचनचिह्नानां वितरणं भविष्यति। पञ्चायत- प्रधान- उपप्रधान- सदस्यानां च परिणामः मतदानस्य दिने एव सायङ्काले घोषयिष्यते, यदा तु जनपदपरिषद्-पञ्चायतसमित्योः मतगणना ३१ मई दिनाङ्के विकासखण्ड-मुख्यालये भविष्यति। तस्मिन्नेव दिने परिणामाः आगमिष्यन्ति। तेन उक्तं यत् निर्वाचनानि शान्तिपूर्णतया निष्पक्षतया च कारयितुं आयोगेन सर्वेभ्यः जनपदेभ्यः निर्देशाः दत्ताः। संवेदनशील- अतिसंवेदनशील- केन्द्रेषु विशेष- सुरक्षा- प्रबन्धाः भविष्यन्ति।
अपरतः, आचारसंहितायाः प्रवृत्तौ सत्यां नूतनाः नियुक्तयः, विकासकार्याणि, राजनैतिककार्यक्रमाः च न भविष्यन्ति। मन्त्रिणः विधायकाश्च अधुना राजकीय-यन्त्राणां प्रयोगं कर्तुं न शक्ष्यन्ति।

# वनविभागे ५०० 'सहायक-वनरक्षक' पदानां सृजनम्, १६००० मासिकवेतनं भविष्यति




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशसर्वकारेण वनविभागे बृहत्स्तरीयायाः नियुक्त्याः मार्गः प्रशस्तः कृतः। सर्वकारेण ५०० सहायक-वनरक्षक (Assistant Forest Guard) पदानां सृजनं विहितम्। एतदर्थं ५०० वर्तमानानि 'वनरक्षक' (Forest Guard) पदानि समापितानि। वनविभागेन प्रसारितायाः अधिसूचनायाः अनुसारं चयनित-अभ्यर्थिभ्यः प्रतिमासं १६,००० रूप्यकाणां निश्चितं मानदेयं (Honorarium) प्रदास्यते। एषा व्यवस्था तत्कालप्रभावेण प्रवृत्ता कृता। एतेषु पदेषु ५० प्रतिशतं आरक्षणं 'वन-मित्रेभ्यः' सुरक्षितं भविष्यति। वन-मित्राणां कृते कस्यापि प्रकारस्य पूर्व-अनुभवस्य अनिवार्यता न अस्ति, किन्तु नियुक्तौ 'रोस्टर-प्रणाली' (Roster System) प्रवृत्ता स्थास्यति। वनविभागस्य अतिरिक्त-मुख्यसचिवेन के.के. पन्तेन अस्य विषयस्य अधिसूचना निर्दिष्टा।

# राष्ट्रपतेः द्रौपदी-मुर्मू-वर्यायाः 'अटल-टलन' इथि प्रवासः निरस्तः





हिमसंस्कृतवार्ताः - शिमला ।भारतस्य राष्ट्रपतिः द्रौपदी-मुर्मु-वर्या सम्प्रति हिमाचल-प्रवासे अस्ति। बुधवासरे तस्याः 'अटल-टनल' (रोहताङ्ग) प्रवासः निश्चितः आसीत्, यः अधुना निरस्तः जातः। देहली-स्थित-राष्ट्रपति-सचिवालयेन प्रतिकूलं वातावरणं (खराब मौसम) दृष्ट्वा एषः निर्णयः स्वीकृतः। द्रौपदी-मुर्मु-वर्या बुधवासरे प्रातः 'अटल-टनल' गन्तुं सज्जा आसीत्, किन्तु अधुना सा शिमला-नगरे एव स्थास्यति।

# टूरिज्म विलेज' इति प्रकरणे

## सर्वोच्चन्यायालयस्य श्रवणाय अस्वीकारः

**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**
सर्वोच्चन्यायालयः पालमपुर-कृषि-विश्वविद्यालयस्य भूमिं पर्यटन-परियोजनायै (Tourism Project) प्रदातुं विरुद्धं हिमाचल-सर्वकारस्य याचिकायाः श्रवणं न कृतवान्। उच्चन्यायालयः अस्याः भूमेः हस्तान्तरणे प्रतिबन्धं (Stay) कृतवान् आसीत्, यं निर्णयं सर्वकारः सर्वोच्चन्यायालयं प्रति आहूतवान्। किञ्चित् कालपूर्वं एषः विषयः प्रकाशे आगतः आसीत् यत् कृषि-विश्वविद्यालयस्य प्रायः ११२ हेक्टेयर परिमिता भूमिः पर्यटन-केन्द्राय प्रस्ताविता अस्ति। उल्लेखनीयमस्ति यत् अस्मात् पूर्वमपि विश्वविद्यालयस्य बहुला भूमिः सर्वकारेण राजकीय-महाविद्यालयाय, विज्ञान-संग्रहालयाय, 'हेलिपैड' इत्यस्मै च स्वीकृता अस्ति। अधुना विश्वविद्यालयस्य पार्श्वे केवलं वर्तमानानां चतुर्णां महाविद्यालयानां—कृषि-महाविद्यालयस्य, पशु-चिकित्सा-पशुविज्ञान-महाविद्यालयस्य, सामुदायिक-विज्ञान-महाविद्यालयस्य तथा आधारभूत-विज्ञान-महाविद्यालयस्य (College of Basic Sciences) च सञ्चालनाय एव भूमिः अवशिष्टा आसीत्, तस्याम् अपि प्रायः ११२ हेक्टेयर भूमिः पर्यटन-केन्द्राय गृह्यते। अक्तूबर २०२३ पर्यन्तं प्रदेश-कृषि-विश्वविद्यालयस्य पार्श्वे ३९७ हेक्टेयर परिमिता भूमिः आसीत्।
अधुना ११२ हेक्टेयर भूमिं विहाय विश्वविद्यालयस्य पार्श्वे भूमेः क्षेत्रफलं ३०० हेक्टेयर परिमितात् अपि न्यूनं भविष्यति। एतं विषयं लक्षीकृत्य कृषि-विश्वविद्यालय-शिक्षक-सङ्घेन (हपौटा) उच्चन्यायालये याचिका प्रदापिता आसीत्, यस्यां न्यायालयेन सितम्बर २०२४ मध्ये भूमि-हस्तान्तरणे निषेधः कृतः।

### भूमि-हस्तान्तरणस्य विरोधे अस्ति 'हपौटा'

कृषि-विश्वविद्यालय-शिक्षक-सङ्घस्य 'हपौटा' इत्यस्य तर्कः आसीत् यत् सर्वोच्च-पर्वतीय-हिमाचल-प्रदेश-कृषि-विश्वविद्यालयस्य एतां भूमिं 'पर्यटन-ग्रामस्य' (Tourism Village) स्थापनायै प्रदातुं निर्णयः सर्वथा अनुचितः अस्ति। सङ्घस्य अध्यक्षः डा. जनार्दन सिंहः अवदत् यत् 'हपौटा' इत्यनेन मुख्यमन्त्री प्रार्थितः यत् सः अस्य निर्णयस्य पुनरावलोकनं कुर्यात् तथा च पर्यटन-ग्रामस्य निर्माणाय विश्वविद्यालय-भूमेः हस्तान्तरण-आदेशं निरस्तं कुर्यात्। उच्चन्यायालये प्रतिबन्धात् परं सर्वकारेण सर्वोच्चन्यायालये याचिका प्रदापिता आसीत्।



# नगरीय-निकायेषु 'नामपत्र' वितरणं कदापि सम्भवम्, युवभ्यः प्राथमिकता- मुख्यमन्त्री सुक्खुः



हिमसंस्कृतवार्ताः- धर्मशाला।
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् प्रदेशे नगरनिकाय-निर्वाचनाय काङ्ग्रेस-दलेन इच्छुकेभ्यः प्रत्याशिभ्यः आवेदनानि आहूतानि सन्ति। प्रदेशाध्यक्षः शीघ्रमेव एतेषु आवेदनेषु विस्तृतचर्चां कृत्वा प्रत्याशिनां घोषणां करिष्यति। तेन सङ्केतः दत्तः यत् पक्षः कदापि 'नामपत्राणां' वितरणं कर्तुं शक्नोति, अस्मिन् च युनः तथा दीर्घकालात् पक्षाय कार्यं कुर्वन्तः कार्यकर्तारः प्राथमिकतां लप्स्यन्ते।टैक्सी-चालक-सङ्घेन उत्थापिते ए.टी.एस. (ATS) विषये मुख्यमन्त्रिणा स्पष्टीकृतं यत् एषा व्यवस्था केन्द्रसर्वकारस्य 'वाहन-पोर्टल' अन्तर्गतं प्रवर्तितः अस्ति। अस्मिन् राज्यसर्वकारस्य साक्षात् भूमिका नास्ति। तेन उक्तं यत् प्रदेशसर्वकारेण एषः विषयः केन्द्रस्य समक्षम् उपस्थापितः, यतोहि प्रदेशस्य जनाः सम्प्रति अस्यै नवीनप्रणाल्यै पूर्णतया सज्जाः न सन्ति। यावत् पर्यन्तं जनाः अस्य पूर्णज्ञानं न प्राप्नुवन्ति, तावत् केचन क्षेत्राणां वाहनेभ्यः विमुक्तिः दत्ता अस्ति। तथापि यत्र 'ए.टी.एस.' केन्द्राणि स्थापितानि सन्ति, तत्र वाहनानां 'पासिंग' (Passing) अनेनैव माध्यमेन करणीयं भविष्यति।
पर्यटन-राजधानी-विषये पृष्टे प्रश्ने मुख्यमन्त्री अवदत् यत् काङ्गड़ा-विमानपत्तनस्य विस्ताराय राज्यसर्वकारेण भूमि-अधिग्रहणार्थं प्रायः सार्ध-त्रिसहस्र- कोटि- रूप्यकाणि व्ययितानि, यस्य कोऽपि कल्पनाम् अपि कर्तुं न शक्नोति स्म। सुक्खुमहोदयेन उक्तं यत् तस्य मुख्यमन्त्रित्वे मुख्यमन्त्रि- प्राथमिकतानुसारमेव विमानपत्तनस्य विस्तारः भवति, अन्यः कोऽपि एतत् कार्यं कर्तुं न शक्नोति स्म। केन्द्रे स्थिता भाजपा-सर्वकारः धनस्य अभावं जनयति। वयं स्वसंसाधनैः राजस्वं प्राप्य सर्वकारं चालयामः। सर्वप्रथमं विमानपत्तनस्य विस्तारः भविष्यति, धर्मशालायाः तपोवनस्य समीपे अन्ताराष्ट्रियस्तरीयं 'कन्वेन्शन सेन्टर' तथा बनखण्डी मध्ये अन्ताराष्ट्रियस्तरीयं प्राण्युद्यानं निर्मातुं गच्छामः। तेन उक्तं यत् नगरोटा-मध्ये 'म्यूजिक फाउंटेन' इत्यस्य शिलान्यासः भविष्यति। मैक्लोडगञ्ज मध्ये एशिया-महाद्वीपस्य बृहत्तमा 'जिप-लाइन' निर्मास्यते।
काङ्गड़ा-जनपदस्य गुप्तगङ्गायाम् त्रिभ्यः राज्येभ्यः आगतानां जनपद-अध्यक्षाणां प्रशिक्षणं चलति, येन वयं ज्ञातुं शक्नुमः यत् कथं आर.एस.एस. संस्थायाः मूलविचारधारायाः सम्मुखीकरणं कर्तुं शक्नुमः। राष्ट्रवादस्य, एकतायाः, अखण्डतायाश्च विचारधारां पुरतः आनीय पक्षकार्यकर्तारः प्रशिक्ष्यन्ते। तेन उक्तं यत् अस्मिन् शिबिरे राहुलगांधी आगच्छति।

## यदि अनुचितं भविष्यति तर्हि 'निविदा' प्रक्रियां निरस्तं करिष्यामः

आचारसंहिताकाले धर्मशाला-नगरनिगमेन विकासकार्याणां 'निविदा' प्रसारणे पृष्टे प्रश्ने मुख्यमन्त्री अवदत् यत् अस्माकं पार्श्वे अस्य सूचना नास्ति। यदि एतादृशं किमपि जातं, तर्हि तत् निरस्तं करिष्यते।

# शिक्षामन्त्री धर्मेन्द्रप्रधानः वर्तमानसत्राय

## एन.सी.ई.आर.टी इत्यनेन सद्य एव प्रकाशितानां पाठ्यपुस्तकानां उपलब्धतायाः वितरणस्य च समीक्षाम् अकरोत्



शिक्षामन्त्री धर्मेन्द्रप्रधानः वर्तमानसत्राय एन.सी.ई.आर.टी इत्यनेन सद्य एव प्रकाशितानां पाठ्यपुस्तकानां उपलब्धतायाः वितरणस्य च समीक्षाम् अकरोत्। शिक्षामन्त्रालयेन प्रोक्तं यत् मन्त्रिवर्येण राज्यप्रशासनैः वितरकैः च सह राज्येषु केन्द्रशासितप्रदेशेषु विशेषरूपेण ग्रामीणक्षेत्रेषु च पाठ्यपुस्तकानाम् उपलब्धतां वितरणसम्बद्धं च विषयमवलम्ब्य चर्चा कृता । श्रीप्रधानेन सम्बद्धाधिकारिणः पुस्तकानां सुगमवितरणाय उपलब्धतायै च निर्दिष्टाः सहैव ई-पाठशाला चेत्यादिषु अन्तर्जालपटलेषु पुस्तकानां डिजिटल छायाप्रतिनाम् उपलब्धता अपि भवेदिति निर्दिष्टा

# विदेशमन्त्री डॉ. एस्-जयशङ्करः संयुक्तराष्ट्र-सङ्घस्य सामान्यसभायाः अध्यक्षया

## अनालेना बेयर्बाक इत्यनया सह नवदेहल्यां मेलनम् अकरोत्।



विदेशमन्त्री डॉ. एस्-जयशङ्करः संयुक्तराष्ट्रसङ्घस्य सामान्यसभायाः अध्यक्षया अनालेना बेयर्बाक इत्यनया सह नवदिल्ल्यां मेलनम् अकरोत् । सामाजिक सञ्जाल-संदेशे, विदेशमन्त्री श्रीजयशङ्करः अवदत् यत्, तौ यूएन अशीति इति नवाचारस्य, सस्टेनेबल्-डेवलपमेण्ट्-गोल्स् इत्यस्य, आर्टिफिशियल इन्टेलिजेन्स् इति कृत्रिमबुद्धिमत्तायाः प्रभावान्, पश्चिम-एशियादेशेषु वर्तमान-संघर्षम् चाधिकृत्य चर्चा कृतवन्तौ। उभयपक्षौ बहुपक्षवादस्य, विशेषतः ग्लोबल-साउथ इत्यस्य, च आवश्यकता अधोरेखितवन्तौ ।

# विनोबाभावे- विश्वविद्यालयस्य स्नातकोत्तर- संस्कृतविभागे भारतीयसेनया विशेषव्याख्यानमायोजितम्।



हिमसंस्कृतवार्ताः- गौरव दुबे, हजारीबाग
हजारीबागनगरे विनोबाभावेविश्वविद्यालयस्य कुलपतेः प्रो. चन्द्रभूषणशर्मणः निर्देशानुसारं राञ्चीस्थित- सेनानियोजन- कार्यालयस्तस्य विश्वविद्यालयस्य स्नातकोत्तरसंस्कृतविभागे एकं विशेषव्याख्यानमायोजयत्। अस्य व्याख्यानस्य अध्यक्षतां पूर्वविभागाध्यक्षः डॉ नकुलपाण्डेयोऽकरोत्। अस्य कार्यक्रमस्योद्घाटनं मुख्यवक्तृ- सेनानी- मनीषकुमारशर्मा मुख्यगुल्मपतिः शर्मारामपालो मुख्यगुल्मपतिः शर्मामनोजकुमारः स्नातकोत्तर- संस्कृतविभागस्य पूर्वाध्यक्षः डॉ. नकुलपाण्डेयः डॉ. अखिलेश्वरपाठकश्च मिलित्वा दीपप्रज्वालनेनाकुर्वन्। मुख्यवक्ता- सेनानीशर्मामनीषकुमारो विद्यार्थिनां सम्बोधनेऽकथयद्यत् प्रत्येकं भारतीयो भारतीयसेनायां गर्वमनुभवति यतोहि भारतीयसेना सर्वदा राष्ट्ररक्षणाय समर्पिता वर्तते। यूयमपि भारतीयसेनायां धर्मगुरुपदे नियुक्ता भूत्वा देशसेवां कुर्वन्तो गौरवमनुभवितुं शक्नुथेति तेनागदितम्। ये संस्कृतविद्यार्थिनः शास्त्रीपरीक्षामाचार्यपरीक्षां वात्यतरन्नथवा ये कर्मकाण्डविषयेण सह स्नातकपदवीमत्यतरन्नथवा ये कर्मकाण्डविषयं विना स्नातकपदवीमुत्तीर्यैकवर्षीय-कर्मकाण्डपत्रोपाधिमलभन्त ते सर्वे सेनायां धर्मगुरुपदे नियुक्ता भवितुमर्हन्ति। सेनानीशर्मामनीषकुमारो धर्मगुरुभ्यः प्रदेयानामाकर्षक-वेतनमानानामन्यासामनुकूलतानाञ्च विषये विद्यार्थिभ्यो विस्तारेणाज्ञापयत्तथा च धर्मगुरुपदे नियुक्त्यै तानप्रेरयद्यतोहि सम्प्रति धर्मगुरूणां बहूनि पदानि रिक्तानि विद्यन्ते। स स्मार्टबोर्डिति नामकप्रज्ञाफलके विद्यार्थिभ्यो भारतीयसेनाया अधिकारेषु कर्तव्येषु च विस्तृतं विवरणमपि प्रास्तौत्। अस्मिन् व्याख्याने विद्यार्थिनोऽपि तेन दत्तां सूचनां प्राप्यातीवोत्साहिता अभवन्। मुख्यगुल्मपति- शर्मारामपाल आवेदनप्रक्रियाया नियोजनप्रक्रियायाश्च विषये विद्यार्थिनोऽबोधयत्। मुख्यगुल्मपति- शर्मामनोजकुमारः सेनानीशर्मामनीषकुमारस्य प्रस्तुतौ तान्त्रिकं साहाय्यमकरोत्। व्याख्यानस्याध्यक्षः डॉ. पाण्डेयनकुलो विषयप्रवेशमतीथीनां स्वागतञ्चाकरोत्। शिक्षिकासहायिकाकुमारीमनीषा मञ्चसञ्चालनमकरोत्तथा च डॉ. पाठकाखिलेश्वरो धन्यवादज्ञापनमकरोत्। अस्मिन् कार्यक्रमे स्नातकोत्तरप्रथमसत्रस्य चतुर्थसत्रस्य च विद्यार्थिभिः सह सन्तकोलम्बामहाविद्यालयस्य संस्कृतविभागस्य छात्रा अपि भागमगृह्णन्। ज्ञातव्यं यत् स्नातकोत्तरसंस्कृतविभागे सेनाया अयं प्रथमः कार्यक्रम आसीद्यश्च विद्यार्थिभ्योऽतीव ज्ञानवर्धकोऽभवत्।

# पश्चिमबङ्गालराज्ये अद्य
## विधानसभानिर्वाचनस्य द्वितीयान्तिम-चरणाय मतदानस्य कृते सर्वाः सज्जताः पूरिताः



पश्चिमबङ्गालराज्ये अद्य विधानसभानिर्वाचनस्य द्वितीयान्तिम-चरणाय मतदानस्य कृते सर्वाः सज्जताः पूरिताः सन्ति। अस्मिन् चरणे सप्तमण्डलानाम् आहत्य द्विचत्वारिंशोत्तरैकशत-निर्वाचनक्षेत्रेषु मतदानं भविष्यति। आहत्य अष्टचत्वारिंशदधिक चतुः शतोत्तरैकसहस्र प्रत्याशिनः नैर्वाचनिकसमरांगणे सन्ति, तेषु विंशोत्तरद्विशतं यावत् महिलाः सन्ति। अस्मिन् चरणे विंशतिलक्षाधिक-त्रिकोट्यधिकाः मतदातारः सन्ति, यस्मिन् साधक कोट्यधिकाः महिलाः, द्विनवत्यधिक सप्तशतं यावत् किन्नर-मतदातारः च सन्ति। आरक्षकैः सुरक्षाभियानानि तीव्रीकृतानि सन्ति। ह्यः निर्वाचन मण्डलेषु अष्टशततोप्यधिकाः जनाः निगडिताः। अद्यावधि त्रयोविंशतिशतम् यावत् जनानां निगडनम् अभवत्। स्वतन्त्रं शान्तियुतं च मतदानं सुनिश्चेतुं निर्वाचन-आयोगस्य निर्देशानुसारं कार्यं कुर्वन्तः आरक्षकाः अभिज्ञातानां उपद्रवीनां लक्ष्यीकुर्वन्तः सन्ति। केन्द्रीयसैनिकाः अपि मण्डलेषु निरीक्षणं, पथसञ्चलनम्, निरीक्षणस्थानानां निरीक्षणं च वर्धितवन्तः।

# गुजरात-नगरनिकायनिर्वाचने भाजपा-दलस्य प्रचण्डविजयः

गुजरातराज्यस्य स्थानीय-निकायनिर्वाचने भारतीयजनतापक्षः महतीं विजयं प्राप्तवान्। दलेन राज्यस्य सर्वेषु प्रमुखनगरनिगमेषु विजयध्वजः स्थापितः। प्रधानमन्त्री नरेन्द्रमोदी गुजरातस्य जनानां प्रति कृतज्ञतां प्रकटयन् उक्तवान् यत् एतेन जनमतेन राज्यस्य भाजपा-दलस्य च सम्बन्धः अधिकः सुदृढः भविष्यति। सः अवदत् यत् मतदाता पुनः एकवारं सुशासनस्य राजनीतौ सर्वकारस्य विकासकार्येषु च विश्वासं प्रकटितवन्तः।प्रधानमन्त्री भारतीयजनतापक्षस्य वरिष्ठनेता च नरेन्द्रमोदी गुजरातराज्ये महानगरपालिका-नगरपालिका-तालुकापञ्चायत-मण्डलपञ्चायतनिर्वाचनेषु प्राप्ताय प्रचण्डबहुमताय राज्यस्य जनतां प्रति कृतज्ञतां प्रकटितवान्। सोशल-मीडिया-माध्यमेन श्रीमोदी अवादीत् यत् एतैः परिणामैः गुजरातराज्यस्य भारतीयजनतापक्षस्य च सम्बन्धः अधिकः सुदृढः जातः अस्ति।श्रीमोदी गुजरातस्य जनान् आश्वासितवान् यत् भाजपा आगामीकाले अपि अधिकपरिश्रमेण कार्यं करिष्यति तथा च राज्यं विकासस्य नूतनशिखरेषु नेष्यति। सः गुजरातराज्ये भाजपा-कार्यकर्तृणाम् अदम्यसाहसस्य प्रयासानां च भूरिशः प्रशंसां कृतवान्। मोदी महोदयेन उक्तं यत् "कार्यकर्तारः सर्वदा जनसामान्यानां मध्ये स्थित्वा तेषां समस्यानां समाधानं कुर्वन्ति, एतदेव गुजराते भाजपायाः निरन्तरसाफलतायाः मुख्यकारणं वर्तते।" स्थानीय-निकायेषु कुल 9,200 आसनेषु भाजपा-दलेन 7,424 आसनानि जितानि। काङ्ग्रेस-दलं केवलं 1,720 आसनेषु विजयं प्राप्तवत्, अन्येभ्यः दलेभ्यः च 740 आसनानि प्राप्तानि।

# वित्तमन्त्रिणा उडुपीनगरे रत्न-आभूषणसंस्थानस्य उद्घाटनं कृतम्



वित्तमन्त्रिणी निर्मला सीतारामन कर्णाटकस्य उडुपीनगरे भारतीय-रत्न-आभूषणसंस्थानस्य (IIGI) नूतनपरिसरस्य उद्घाटनं अकरोत्। अस्मिन् अवसरे वित्तमन्त्रिण्या उक्तं यत् एतत् नूतनं प्रशिक्षणसंस्थानं युवकानां युवा-उद्यमिनां च कृते व्यावसायिकप्रशिक्षणं प्रदास्यति। संस्थाने आभूषणनिर्माणं, सङ्गणक-प्रारूपं (Computer Designing), रुपान्तरण परीक्षणं, परिष्करणं (Finishing) च कर्तुं एकचत्वारिंशत् (41) यन्त्राणि उत्पादनसुविधाः च उपलभ्यन्ते। अस्मिन् अवसरे 'प्रयोगशाला-हीरक-प्रौद्योगिकी' क्षेत्रे विशेषप्रमाणपत्रपाठ्यक्रमाय भारतीय-रत्न-आभूषणसंस्थानस्य तथा आई.आई.टी. मद्रास इत्यनयोः मध्ये सामञ्जस्य-पत्रे (MoU) हस्ताक्षरं अपि अभवत्।

# धार्मिककार्यक्रमाणां नाम्ना मार्गावरोधः न करणीयः - सर्वोच्चन्यायालयः




सर्वोच्चन्यायालयः अवदत् यत् धार्मिकगतिविधीनां नाम्ना सार्वजनिकमार्गाः अवरोद्धाः न शक्यन्ते। शीर्षन्यायालयेन उक्तं यत् यदि नागरिकाणां सामान्याः गतिविधयः बाधिताः भवन्ति, तर्हि सर्वकारः हस्तक्षेपं कर्तुं शक्नोति। मुख्यन्यायाधीशस्य सूर्यकान्तस्य अध्यक्षतायां नव-न्यायाधीशानां संविधानपीठेन केरलस्य शबरीमाला-मन्दिरसहितं पूजास्थलेषु धार्मिकस्वतन्त्रतायाः क्षेत्रे तथा महिलाभिः सह भेदभावसम्बद्धानां याचिकानां श्रवणकाले एषा टिप्पणी कृता। न्यायालयेन स्पष्टीकृतं यत् धार्मिकसमुदायेभ्यः पूजाविधिषु स्वायत्तता अस्ति, किन्तु एषा स्वायत्तता सार्वजनिकव्यवस्थां वा नागरिकाणां आवश्यककार्याणि वा बाधितुं न प्रभवति। न्यायमूर्तिः बी.वी. नागरत्ना उक्तवती यत् धार्मिकआयोजनेषु सार्वजनिकमार्गाणां पिधानं न उचितम्, राज्यं च तादृश्यां स्थितौ हस्तक्षेपं कर्तुं शक्नोति। पीठेन उक्तं यत् न्यायालयाः पूजापद्धतौ निर्णयं दातुं न शक्नुवन्ति, परन्तु यदा नागरिकाणाम् अधिकाराः प्रभाविताः भवन्ति, तदा हस्तक्षेपः अनिवार्यः भवति।

# संयुक्त-अरब-अमीरात-देशः 'ओपेक' (OPEC) समूहात् पृथक् भविष्यति

संयुक्त-अरब-अमीरात (UAE) देशेन अस्मिन् वर्षे मे-मासस्य प्रथमदिनाङ्कात् 'ओपेक' (पेट्रोलियमनिर्यातकदेशानां सङ्घः) इत्यस्मात् पृथक् भवितुं घोषणा कृता। एषः निर्णयः देशस्य राष्ट्रिय-उत्पादननीतिं, क्षमतां, दीर्घकालिक-आर्थिक-प्राथमिकतां च दृष्ट्वा कृतः अस्ति। अधिकारिभिः उक्तं यत् एतेन जागतिकविपणेः अस्थिरतां प्रति सहनशीलता वर्धिष्यते। संयुक्त-अरब-अमीरात-देशेन प्रतिपादितं यत् एषः निर्णयः राष्ट्रियहितं तथा जागतिक-ऊर्जा-माङ्गस्य पूर्त्यै प्रतिबद्धतां च दर्शयति।




# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य काः विचित्राः वार्ताः सन्ति?

**नन्दिनी-** शृणु, एकेन पुरुषेण धनार्जनार्थं स्वकीये शौचकूपे विज्ञापनस्थानं विक्रीतम्। बहुभिः प्रसिद्धसंस्थाभिः तत् क्रीतम् अस्ति।

**काव्या-** अहो, एषः विचित्रः व्यापारः। धनलोभः मानवान् कुत्र नेष्यति! विपणनस्य एतादृशः मार्गः मया कदापि न चिन्तितः।

राजस्थानराज्ये अपि कश्चित् पुरुषः प्रसिद्धः जातः, येन उष्णातपात् रक्षितुं शिरसि बृहत् क्षीरपात्रं धृतम्।

**नन्दिनी-** सत्यम्, तस्य चित्रं मया दृष्टम्। सः तु आतपात् रक्षितः। किन्तु अन्यत्र बुद्धिः एव भ्रष्टा इति भाति। शिरस्तु रक्षितं, परन्तु मार्गे सुरक्षायाः किं भविष्यति? पश्य, बेङ्गलूरु-नगरे एकेन चालकेन षट् बालकाः एकस्यां द्विचक्रिकायाम् आरूढाः कृताः सन्ति।

**काव्या-** एतत् तु अतीव भयावहम्। तादृशेभ्यः पितृभ्यः आरक्षकैः दण्डः दत्तः इति अहं मन्ये। वाहने तु स्थानं नास्ति, तथापि जनाः बलात् उपविशन्ति। वासस्थानस्य विषये अपि एतादृशी एव समस्या अस्ति। न्यूयार्क-नगरे एकं वासस्थानं दृष्टम्, यत् कारागृहात् अपि लघुतरं दृश्यते।

**नन्दिनी-** आम्, तस्य मूल्यं तु द्वादशशतं डोलर्-परिमितम् इति श्रुतम्। तादृशे लघुस्थाने जीवनं कथं शक्यते? अस्तु काव्ये, अद्य एतावत्यः वार्ताः एव।

# लौकिकन्यायकोशः
# अरण्यरोदनन्यायः

अरण्ये रोदनम् इति न्यायस्य अभिप्रायः। अरण्ये कियदपि रोदनं कृतं चेदपि तत् व्यर्थम् एव । रोदनं प्रति कस्यापि ध्यानं गच्छेत् इत्ययं प्रश्न एव न उद्भवति । अतः सहानुभूतिः अप्राप्या भवति। अस्य न्यायस्य आधारेण व्यर्थक्रियाणां वर्णनं क्रियते।

तुल्याः न्यायाः-- अन्धदर्पणन्यायः, ऊषरवृष्टिन्यायः इत्यादयः।

धूर्तस्य सेवा कथं व्यर्था भवति इति बहुभिः उदाहरणैः कथितमस्ति--अरण्यरुदितं कृतं शवशरीरमुद्वर्तितम् स्थले कमलारोपणं सुचिरमूषरे वर्षितम्। श्वपुच्छमवनामितं बधिरकर्णजापः कृतः कृतान्तमुखमण्डना यद् अबुधो जनः सेवितः।। {पञ्चतन्त्रम् १-१५५}।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**